International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(1): 15-19
© 2016 IJSR
www.anantaajournal.com
Received: 19-11-2015
Accepted: 17-12-2015

**Lingampalli Ganganarsaiah**
M.A (Ph. D) Research scholar
Department of Sanskrit, Arts College, Osmania University
Hyderabad, India

**Correspondence**
**Lingampalli Ganganarsaiah**
M.A (Ph. D) Research scholar
Department of Sanskrit, Arts College, Osmania University
Hyderabad, India

# पुराणेषु वास्तु विज्ञानम्

**Lingampalli Ganganarsaiah**

**वास्तुज्ञानं प्रवक्ष्यामि यदुक्तं ब्रह्मणा पुरा । ग्रामसद्मपुरादीनां निर्माणं वक्ष्यतेऽधुना ।।** [1]
भारतीयसम्प्रदायानुसारं मानवाः जीवनपरमार्थान् धर्मार्थकामामोक्षान् साधयितुं अष्टादशविद्याः अपि च चतुषष्टिकलाः अवश्यम् अभ्यसेयुः। महर्षिभिः एतासां विद्यानां कलानाञ्च प्राणैषण, धनैषण, परलोकैषण, इतीमानि प्रयोजनानीति निर्दिष्टाः ।
भारतीयवाङ्मये एताः विद्याः कलाः उध्दिश्य विस्तारतया उल्लेखाः दरीदृश्यन्ते । ब्रह्मवैवर्तपुराणम्, विष्णुपुराणम् श्रीमद्भागवतम्, हरिवंशम्, वात्स्यायनकामसूत्रम्, शुक्रनीतिसारः, कौटिल्यार्थशास्त्रम्, ललितविस्तारादिग्रन्थेषु विद्याः कलाश्च विभिन्नसङ्ख्याभिः, विविधनामभिः प्रस्ताविताः। वास्तु चतुष्षष्टिकलास्वन्तर्गतत्वेन सर्वैरपि आद्रियते । सर्वविद्यास्विव वास्तुशास्त्रेऽपि भारतीयाः गुरुस्थानमेव अलञ्चक्रुः।

**मत्स्यपुराणे वास्तुशास्त्रप्रवर्तकाः एवं प्रोक्ताः**

भृगुरत्रिवशिष्ठश्च विश्वकर्मा मयस्तथा।
नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः ।।
ब्रह्मा कुमारो नन्दीशः शौनको भर्ग एव च ।
वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती ।।
अष्टादशैते विख्याताः शिल्पशास्त्रोपदेशकाः।। [2]

**वास्तुनिर्वचनम्**
वास्तु इत्ययं शब्दः वस निवासे इत्यस्माद्धातोरुत्पन्नः वर्तते । अयं च शब्दः मानवनिवासयोग्यस्थानसूचकतया आ च बहोः कालात् अद्यावधि व्यवह्रियते । वास्तुशब्दस्य विभिन्नग्रन्थेषु विभिन्नार्थाः विद्यन्ते । तदित्थं वर्तते –

**नगरादिकवास्तुं च वक्ष्ये राज्याधिवृद्धये ।** [3]
**प्रासादारामदुर्गदेवालयमठादिवास्तुमानलक्षणनिरूपणम् ।** [4]

आवास वासवेश्मादि पुरे ग्रामे वणिक्पथे ।
प्रासादाराम दुर्गेषु देवालयमठेषु च । [5]
ग्रामं क्षेत्रमारामस्सेतुबन्धस्तटाकमाधारो वा वास्तुः । [6]

वास्तुभेदाः धरा (निर्माणस्थलम्) हर्म्यम् (भवन. प्रासाद. मण्डप. सभा. शालाः) यानम् (आसन्दिकास्यन्दनम् शिबिका रथाः) पर्यङ्कम्
(पञ्जरमञ्चककाष्टफलकासनबालपर्यङ्कानि) गृह.ग्राम.नगर. देवायतन –प्रासाद –दुर्ग. आराम-तटाक-सेतुबन्धादि निर्माणलक्षणबोधकं शास्त्रं वास्तुशास्त्रमिति बोध्यते ।

**वास्तुशास्त्रग्रन्थाः**

भारतीयानां वास्तुविज्ञानं सर्वोत्कृष्टम् वर्तते । भारतीयानां आध्यात्मिकविकासानुगतत्वेन तत्तत्प्रयोजनभूयिष्ट आराधानानि उपासनाश्च जाताः । तेषां आनुकूल्येन देवतागाराः आविर्भूताः। वेदोपनिषत्सु देवतानां मूर्तयः, देवातागाराः, आराधनाः, इत्याद्यंशाः प्रस्ताविताः। एवम् आपस्तम्ब, बोधायनगृह्यसूत्रादिग्रन्थेषु यज्ञशाला वेदिकानिर्माणम् इत्याद्यंशाः दृश्यन्ते ।

**विविधपुराणेषु वास्तुविषयाः**

पुराणेषु मत्स्य, गरुड, स्कन्द, नारद, ब्रह्माण्ड, भविष्य, लिङ्ग, वायु, अग्नि, इत्यादिपुराणेषु वास्तुलक्षणानि वास्तुविषयाश्च वर्णिताः दृश्यन्ते । अग्निपुराणे देवालयनिर्माणं:(38), शिलान्यासविधिः(41), प्रासादलक्षणं (42), वासुदेवादिप्रतिमालक्षणं, (44), नगरादिकवास्तुकथनम् (106), इत्याद्यंशाः प्रतिपादिताः। एवं मत्स्यपुराणे वास्तूत्पत्तिः(251), गृहनिर्माणकाल निर्णयः(252), चतुश्शालानिर्माणक्रमः(253), प्रतिमालक्षणं:(258), इत्याद्यंशाः प्रोक्ताः। गरुडपुराणे वास्तुमानलक्षणम्: (46), प्रासादलिङ्गमण्डपादिलक्षणं(47), इत्यादि विषयाः वर्णिताः। एवं विष्णुधर्मोत्तरपुराणे नानादेवप्रतिमालक्षणं, प्रासादभेदकथनं:(86), सर्वतोभद्रप्रासादलक्षणम्: (87), देवालयभूपरीक्षा:(93), इत्यादिविषयाः उल्लिखिताः सन्ति । एवं गरुडपुराणे गृहे विविधदिक्षु विविधदेवतास्थापनविधिः(46), प्रासादादीनां लक्षणानि: (47), सर्वदेवताप्रतिष्ठाविधिः(48), इत्यादिविषयाः दृश्यन्ते । एवं कौटिलीयार्थशास्त्रे, एवं शुक्रनीतिसारग्रन्थे च वास्तुशास्त्रसम्बद्धविषयाः दृश्यन्ते । वास्तुशिल्पलक्षणनिरूपणम् अन्यवाङ्मयापेक्षया आगमग्रन्थेषु अधिकतया दृश्यते इति वक्तुं शक्यते । आगमेषु भूपरीक्षा, स्थलपरीक्षा, दिक्साधना, हर्म्यप्रासाददेवायतनदेवताप्रतिष्ठादि निर्माणविधयः सप्रमाणतया निरूपिताः । आगमग्रन्थाः बहवः यद्यपि लभ्यन्ते तथापि अंशुमद्भेदागम, कामिकागम, कारणागमप्रभुतिषु वास्तुसम्बद्ध विषयाः अधिकतया द्रष्टुं शक्यन्ते ।

**वास्तुशास्त्रस्वतन्त्रग्रन्थाः**

वास्तुशास्त्रस्वतन्त्रग्रन्थाः अपि अस्माकं बहवः वाङ्मये दृश्यन्ते।मानसारशिल्पशास्त्रम्, मयमतम्, विश्वकर्म. प्रकाशिका, शिल्परत्नाकरः. वास्तुमण्डनम्, वास्तुविद्या, मानसोल्लासः, इत्यादिग्रन्थाः सन्ति । एतेषु सर्वेषु वास्तुशास्त्रग्रन्थेषु मानसारः देवालय ग्राम निर्माण लक्षण प्रतिपादकः उत्तमग्रन्थः इति वक्तुं शक्यते । एतं ग्रन्थं दाक्षिणात्याः प्रमाणतया स्वीकुर्वन्ति ।

**वास्तुपुरुषोत्पत्तिः**

मत्स्यपुराणे वास्तुपुरुषोत्पत्तिः एवं प्रकारेण कथितास्ति । त्रेतायां ब्रह्म एकं भयङ्करं भूतमसृजत् । स भूतः लोकान् बाधति स्म। सुरलोकवासाः अमराः तस्य दुरागतान् ब्रह्मदेवं प्रति निवेदयामासुः । तदा ब्रह्मा तं भूतं भूमौ न्यक्षिपत् । स भूतः अधोमुखतया ईशान्ये शिरस्सन् नैऋतौ पादौ सन्, भूमौ अपतत् । तदा ब्रह्मा ग्रामनगरवापी दुर्गपत्तन प्रासाद प्रपाजलोद्यानादि निर्माण समयेषु जनाः अवश्यं भवन्तं पूजयन्ति ये केपि तथा न पूजयन्ति तेषां पदे पदे विघ्नाः भवन्ति ऐश्वर्यञ्च नश्यति इति तस्मै वरमाददत् । एवं प्रकारेण निर्माणादिषु वास्तुपूजा मुख्यांशत्वेन परिगण्यते । (मत्स्यपुराणम् 251अध्यायः)

**वास्तुभेदाः**

कामिकागमे वास्तु स्थलप्रधानं, जलप्रधानमितिद्विविधः भवति । प्रथमः पुनः हर्म्यादिवास्तु, पर्यङ्कादिवास्तु इति द्विविधः भवति । हर्म्यादिवास्तुविभागे देवालयमण्टपराजभवनसभाङ्गणम् नाटकशालाः इत्यादिविषयाः उच्यन्ते । पर्यङ्कादिवास्तुविषये शिबिराणि मञ्चाः शकटानि प्रभृतयः भवन्ति ।

द्वितीयं जलप्रधानवास्तु त्रिविधः भवति । जङ्गालं अनूपदेशः साधारणदेश इति । कामिकागमे जलप्रधानवास्तु शैव, ब्राह्म, वैष्णव, इन्द्र, जौक्ष, भौतिक, असुर, पैशाच, वारुण, आग्नेय इति दशविधत्वेन उक्तम् । एतेषां लक्षणान्यपि अत्र उल्लिखितानि ।

**भूग्रहणम-** स्थल-तीर्थ-देवतानां युक्तलक्षणसम्पन्नं मानवनिवासयोग्यः भवतीति निश्चप्रचम्प्रोक्तम् । जनानां सर्वथा सर्वदा अभ्युदयकररूपयोग्यतया भवितव्यम्, तादृशस्थलम् अन्विषन्ति । यत्र शुचिर्भवति तत्र आध्यात्मिकदिव्यत्वम् प्रकाशते इति प्राचीनाः विश्वसन्ति । जानावासानां फलवृक्षलतापूर्णं जन्तुपक्षिनिवासयोग्यं, कृषियोग्यं, जलसमृध्दं, सारवत्तं, भूमिमेव ग्राह्यम् इति वास्तुशास्त्रज्ञाः असूचयन् ।

**भूपरीक्षा**

कीदृशस्थलः जनानां श्रेयस्करो भवतीत्यस्य विषयज्ञानाय शास्त्रज्ञाः भूपरीक्षाविधानं अविदुः। भूमेः गुणम् अधारीकृत्य वास्तुभूमिः उत्तम, मध्यम, अधम, इति भवति । एनं विषयं ज्ञातुं काश्चन परीक्षाःअपि अत्र सूचिताः। एतासां परीक्षाणां विवरणम् तत्तत् वास्तुग्रन्थेषु उट्टङ्कितम् ।वास्तुशास्त्रोक्त परीक्षाधारेण उत्तमं भूमिं विज्ञाय निर्माणं कार्यम् । तादृशनिर्माणे मानवाः शत्रुचोरादिपीडारहिताः सन्तः आनन्दभरिताः भवन्ति ।

वास्तु शास्त्रमनुसृत्य ब्राह्मणक्षत्रियवैश्यशूद्राणां निवासयोग्या भूमिरेवं निर्दिष्टा। ब्राह्मणानां श्वेतवर्मा क्षत्रियाणां रक्तवर्णा, वैश्यानां पीतवर्णा, शूद्राणां कृष्णवर्णाभूमिःप्रशस्ता भवति । घृतगन्धा भूमर्विप्रणां, रक्तगन्धभीमिः क्षत्रियाणां, अन्नगन्धाभूमिः वैश्यानां मद्यगन्धा शूद्रानां निवासयोद्याएतथैव दूर्वायुक्तापृथ्वी उत्तमा भवति ।

**वास्तु लक्ष्म प्रवक्ष्यामि विप्रादीनां च भूरिह ।**
**श्वेचा रक्ता तथा पीता कृष्णा चैव यथा क्रमम् ।।**
**धृतरक्तान्न मद्यानां गन्धाढ्या वसतञ्च भूः।**
**मधुरा च कषाया च आम्लादुयुपरसा क्रमात् ।।**
**कुशैः शरैस्तथा काशैः दूर्वाभिर्याच संश्रिता ।**
**प्राच्यं विप्रांश्च निःशल्यो खातपूर्वन्तु कल्पयेत् ।।**[7]

## ग्रामविन्यासः

भूपरीक्षानन्तरं निर्माणकार्यीदीनां आरम्भः भवति । तेषु ग्रामनिर्माणरीतयःअधोनिर्दिष्टप्रकारेण उक्ताः। अग्रहारः, ग्रामः, एकभोगः, नगरं, पुरः, पट्टणं, खेटकं, खर्वटं एशिबिरं, सेनामुखं, मठं, राजधानी, इति कामिकागमे प्रकीर्णक, सम्पत्कर, नरक, श्रीपतिष्ठित, श्रीवत्स, कुम्भक, वैदिक, इति सप्तभेदाः उक्ताः । मानसारशिल्पशास्त्रे दण्डक, सर्वोतभद्र, नन्द्यावर्त, पद्मक, भद्रक, स्वस्तिक, प्रस्तर, कार्मुख, चतुर्मुख, इति अष्टविधानां ग्रामनगरादिनिर्माणभेदाः तेषां लक्षणान्यपि च उक्ता । ग्रमससम्बध्दविषयाः ब्रह्माण्डपुराणे उल्लेखः एवं दृश्यते ।

**खेटानां च पुराणां च ग्रामाणां चैव सर्वशः।**
**त्रिविधानां च दुर्गानां पर्वतोदरधन्विनाम् ।।**
**नगराद्योजनं खेटम् खेटात् ग्रामोर्धयोजनम् ।।**
**द्विक्रोशे परमासीमा क्षेत्रसीम चतुर्धनुः।।**

## राजधानी

राजनीतिशास्त्रग्रन्थेषु राजधानी नगरदुर्गादीनां प्राधन्यमुक्तम् । शुक्रनीतिसारग्रन्थे राजधानीनगर निर्माणं कुत्र कर्तव्यं इत्ययं विषयः एवमुक्तः-

**नानावृक्षलताकीर्णे पशुपक्षगणावृते**
**सबहूदकधान्ये च तृणकाष्ठसुखे सदा।।**
**आसिन्धवोगमाकूले नातिदूरमहीधरे**
**सुरम्यसमभूद्देशे राजधानीं प्रकल्पयेत् ।।**

सारे दुर्गाः शिबिर, वाहिनीमुख, स्थानीय, द्रोणक, सम्विद्ध, निगम, स्कन्धावाराः इति अष्टविधाः प्रोक्ताः । निर्मीयमाण स्थलभेदेन दुर्गः गिरिदुर्ग, वनदुर्ग, जलदुर्ग, रथदुर्ग, देवदुर्ग, पङ्कदुर्ग, मिश्रदुर्ग, इति व्यवह्रियते ।

## जनावासगृहाः

साधारणतया ग्रामनगरदेवालयनिर्माणे प्रतिपादित विधानमेव गृहनिर्माणविषयेऽपि अनुसर्तव्यम् । जननिवासयोग्यगृहाः गृह, सदन, भवन, प्रासाद, इति विभक्ताः मानसारे शालाविधानलक्षणं इत्यस्मिन्विभागे निर्माणलक्षणानि उक्तानि । विश्वकर्मशिल्पे गृहाणां भेदाः पञ्चचत्वारिंशत् संख्याकाः उल्लिखाताः। मेरु, मन्दर विमान, भद्रक, सर्वतोभद्र, रुचक नन्दन, नन्दिवर्धन श्रीवत्स, बाडभि, गृहराज शालग्राम, मन्दिर. वैराज ब्रह्ममन्दिर, भवन, बित्तम्भि, शिबि, वलय, दुन्दुभि, पद्म, महापद्म, नन्द्यावर्त, वर्धमान, स्वस्तिक, धान्यक गुहवृक्ष, ग्रह, वृषभ, गण्ड, गरुड, सिंह, भूमुख, भूधर, श्रीजय, पृथिवीधर, वज्र, चक्र, पुष्टिक, बब्रु, वक्र, वर्धिनी, खड्ग, गदा, श्रीवृक्षः इति । अग्निपुराणेऽपि ईषद्भेदेन देवगृहभेदाः प्रोक्ताः।

## गृहविन्यासः

मानावानां निवासयोग्यं अत्यन्तं पवित्रमयं भवति गृहं । एतस्मिन् गृहे कुत्र किं कार्यं करणीयं तत्सम्बध्द प्रकोष्ठं कुत्र निर्मापणीयं इत्ययं विषयः अत्यन्तप्रधानः दृश्यते । अयं च विषयः गृहविन्यासः इति कथ्यते । तदुक्तं अग्निपुराणे प्राच्यां दिशि श्रीगृहं आग्नेये महानसं, दक्षणायां दिशि शयनं, नैरुत्यां आयुधागारः, पश्चिमायां दिशि भोजनम् वायुव्यां धान्यगृहं उत्तरे संस्थानमं ऐशान्यां दिशि देवातागृहं निर्मापणीयम् । एषः क्रमः सर्वेषां सर्वविधाभिवृध्दये भवति इति ।

**पूर्वस्यां श्रीगृहं प्रोक्तं आग्नेय्यां वै महानसम् ।**
**शयनं दक्षिणस्यां तु नैरुत्यां आयुधाश्रयम् ।।**
**भोजनम् पश्चिमायां तु वायव्यां धान्यसंग्रहः।**
**उत्तरे संस्थानम् ऐशान्यं देवतागृहम् ।**
**चतुश्शालां त्रिशालं वा द्विशालां चैकशालकम्।**
**चतुश्शालागृहाणां तु शालालिन्दकभेदतः।।** 10

गृहविन्यासक्रमः मत्स्यपुराणे ईशन्मात्रभेदेन अपि च अग्निपुराणेष्वनुक्त बन्धस्थानं ध्यानमन्दिरं, इत्याद्यंशाः प्रोक्ताः।

**ईशाने देवतागारः तथाशान्तिगृहं भवेत् ।**
**महानसम् तथाग्नेये तत्पार्श्वे चोत्तरे जलम् ।।**
**गृहस्योपस्करम् सर्वम् नैरुत्ये स्थापयेत् बुधः।**
**बन्धस्थानंबात्रूम्द्ध बहिः कुर्यात् स्नानमंडपमेव च ।।**
**दान ध्यानं च वायव्ये कर्मशालं तथा बहिः।**
**एवं वास्तु विशेषाः स्यात् गृहभर्तुः शुभाह्वये ।।**

## मण्डपः

प्रासाददेवालयस्य अनुरूपतः भवति मण्डपः । मण्डपाः ज्येष्ठमध्यकनिष्ठभेदेन त्रिविधाः भवन्ति ।

1.पुष्पकः- 64 स्तम्भाः
2.पुष्पभद्रः- 62 स्तम्भाः
3.सुव्रतः- 60 स्तम्भाः
4.अमृतमन्थनः- 58 स्तम्भाः

5.कौशल्यः- 56 स्तम्भाः
6.बुध्दिसङ्कीर्णः- 54स्तम्भाः
7.गजभद्रः- 52स्तम्भाः
8.जयावहः-50 स्तम्भाः
9.श्रीवत्सः-48 स्तम्भाः
10.विजयः- 46 स्तम्भाः
11.वास्तुकीर्तिः-44 स्तम्भाः
12.श्रुतिञ्जयः-42 स्तम्भाः
13.यज्ञभद्रः-40 स्तम्भाः
14.विशालः-38 स्तम्भाः
15.सुश्लिष्टः-36 स्तम्भाः
16. शत्रुमर्दनः-34 स्तम्भाः
17.भागपञ्चः-32 स्तम्भाः
18.ननन्दः-30 स्तम्भाः
19.मानवः-28 स्तम्भाः
20.मानभद्रकः-26 स्तम्भाः
21.सुग्रीवः-24 स्तम्भाः
22.हरितः-22 स्तम्भाः
23.कर्णिकारः-20 स्तम्भाः
24.शतर्धिकम्ः-18 स्तम्भाः
25.सिंहः-16 स्तम्भाः
26.श्यामभद्रः-14 स्तम्भाः
27.शशकः-12स्तम्भाः

त्रिविधाः मण्डपाः कार्या
ज्येष्ठमध्यकनीयसः।नामतस्तप्रवक्ष्याममि
श्रुणुध्वमृषिसत्तमाः।।
पुष्पकः पुष्पभद्रश्च सुव्रतमृतमन्थनः। कौशल्यो बुध्दिसङकीर्णो गजभद्रो भयावहः।
श्रीवत्सो विजयश्चैव वास्तुकीर्ति श्रुतिञ्जयः।।यज्ञभद्रो विशालश्य सुश्लिष्टश्शत्रुमर्दनः।
भागपञ्चो ननन्दश्च मानवो मानभद्रकः।सुग्रीवो हरतिश्चैव कर्णिकारश्शतर्दिकः।
सिहंश्च श्यामभद्रश्च शशकश्च तथैव च ।।[12]

मण्डपाः त्रिकोणं, अथवा वृत्ताकाररूपेणवाए अष्टभुजाकृतिरूपेण वा
षोडशभूजाकृतिरूपेणवा अथवा चतुर्भुजाकृतिरूपेणा वा निर्मापणीयं इति निर्माणविधिरपि उक्तम् ।।

**त्रिकोणं वृत्तमध्यंतु ह्यष्टकोणं द्विरष्टकं।**
**चतुष्कोणं च कर्तव्यं संस्थानं मण्डपस्य तु ।।**
**भित्तर्द्वैगुण्यतो वापि कर्तव्यः मण्डपाः क्वचित् ।**
**प्रासादस्याग्रतः कुर्यात् मंडपानाम् दशहस्तकम् ।**
**कुर्यात् द्वादशहस्तम् वा स्तम्भैषोडशैर्युतम् ।।**
**ध्वजाष्टकैश्चतुर्हस्तम् मध्ये वेदिं च कारयेत् ।।** [13]

**प्रासादः**

प्रासादः शब्दः देवालयप्रासादविषये अपि च धनिनां भवनानां विषये च प्रयुक्तः दृष्यते वाङ्मये एवं व्यवहारे च। तदुक्तं अमरकोशे-**हर्म्यादि धनिनां वासः प्रासादो देवभूभुजाम्।** प्रसीदन्त्यस्मिन्निति प्रासादः पद लृ विशरणगत्यवसादनेषु । एवं प्रमुदितास्सीदन्त्यस्मिन्निति प्रासादः।[14]

पुराणेषु मात्रम् प्रासादः केवलं देवालयानामेव प्रमुखतया प्रयुक्तः इत्यवगम्यते । तदित्थं वर्तते ।
भविष्यपुराणाने त्रिंशदुत्तरशततमोऽध्याये भवनानां विभिन्नप्रकाराः एवं प्रोक्ताः।

1.मेरु
2.भौमः
3.मन्दरः
4.कैलासः
5.विमानं
6.नन्दन
7.समुद्रः
8. पद्मः
9.गरुडः
10.नन्दिवर्धनः
11.कुञ्जरः
12.गृहराजः
13.वृषः
14.हंसः
15.घटः
16.सर्वतोभद्रः
17.सिंहः
18.वृत्तं
19.चतुष्कोणः
20.षोडशकोणः

**पूर्वे मेरुर्महाबाहो कैलासश्च तथापरे ।।**
**भवन्ति चापरे वीर विमानच्छदनं तथा ।**
**समुद्रपद्मगरुडनंदिवर्धनरुञ्जराः।।**
**गृहराजो वृषो हंसः सर्वकोभद्रको घटः।**
**सिंहो वृषचतुष्कोणः षोडशाष्टाश्रयस्तथा ।।**
**इत्येते विंशति प्रोक्ताः प्रासादा यदुनन्दन ।** [15]

गुरडपुराणे भवनप्रकाराः एवं निर्दिष्टाः। गरुडपुराणे आचारखण्डे सप्तत्युत्तरचत्वारिंशत्तमाध्याये भवनप्रकाराः उद्दिष्टाः। ते च वैराजः, पुष्करः, कैलासः मालिका त्रिविष्टपं इति पञ्चविधानि भवनानि निरूपितानि ।

**प्रासादानां च वक्ष्यामि मानं योनिं च मानतः।**
**वैराजः पुष्पकाख्यश्च कैलासो मालिकाह्वयः।।**
**त्रिविष्टपं च पञ्चैते प्रासादाः सर्वयोनयः।**

**देवताप्रतिमालक्षणानि**

अग्निपुराणे सूर्यस्य देव्याःचतुषष्टियोगिन्यादिलक्षणं एवं लिङ्गस्य सालग्रामादिमूर्तानां निर्माणक्रमं चतुश्चत्वारिंश

दध्यायारभ्यपञ्चपञ्चाषत्तमाध्यायपर्यन्तं विविधदेवतानां प्रतिमानां लक्षणानि सम्यक् निरूपितानि । तत्र वासुदेवप्रतिमालक्षणानि एवं निर्दिष्टानि ।

**प्रासादस्योत्तरे पूर्वमुखेवा चोत्तराननम् ।**
**संस्थाप्य पूज्य च बलिं दत्वा मध्यसूत्रकम् ।।**
**शिलां शिल्पी तु नवधा विभज्यनवमेंशके ।**
**सूर्येभक्ते शिलायांतु भागं स्वाङअगुलमुच्यते ।**
**व्यङ्गुलं गोलकं नाम्ना कलानेत्रं तदुच्यते ।**
**भागमेकं त्रिधा भक्त्या पार्ष्णिभागं प्रकल्पयेत् ।।**
**भागमेकं तथा जानौ ग्रीवायां भागमेव च ।**
**मुकुटं तालमात्रं स्यात्तालवूरुकौतथा ।**
**तालद्वयेन जंघास्यात्सूत्राणि श्रुणु साम्प्रतम् ।।** [17]

**निर्माणविधानक्रमः**

निर्माणस्थलमानं, निर्मीयमाणालयाः, वीथयः, तटाकादयः, उद्यानानि, प्रभृतीनां पादविभजनं, बलिकर्म, गृहनिर्माणारम्भः, गर्भविन्यासः, शुभमुहूर्ते शान्तिकर्माणि कृत्वा गृहप्रवेशः, एते विषयाः अत्यन्तप्रधानाः भवन्ति । कामिकागमे इतोऽपि विस्तृततया निर्माणक्रमः एवमुक्तः।

**ग्रामादीनां तु विन्यासो निवेशादिश्चकथ्यते ।**
**आदौ कालपरीक्षी स्यात् द्वितीयो देशनिर्णयः।।**
**तृतीया भूपरीक्षास्यात् प्रवेशार्थबलिस्ततः।**
**स्वीकारः पंचमोभूमेः षष्ठः कर्षणमुच्यते ।**
**शंकुसंस्थापनं पश्चादष्टमः पदनिर्णयः।**
**नवमः सूत्रविन्यासो दशमो देवाताबलिः।।**
**गृहवीत्थादिभेदः स्यादेकादश उदाहृतः**
**द्वादशोगर्भ विन्यासस्ततो देवनिवेशनम् ।।** [18]

1.कालनिर्णयः 2.स्थलनिर्णयः 3. भूपरीक्षा 4.बलिविधानं 5. भवनान्तर्भागनिर्देशः 6.स्थलकर्षणम् 7.शङ्खुस्थापनं 8.पदनिर्णयः 9.सूत्रविन्यासः 10. निर्माणारम्भे देवताबलिः 11.वीथ्यादिनिर्माणम् 12. गर्भे देवतानिवेशनम् एवं रीत्या क्रममनुसृत्य निर्मितगृहादिनिर्माणानि समस्तशुभानि कल्पयन्ति ।

**वास्तुविशेषाः**

ग्राम– नगर- गृहदेवायतन- प्रासादादिनिर्माणानि सर्वान्यपि सर्वलक्षणसंशोभिततया विराजमानाय वास्तुशास्त्रे आरम्भात् समाप्तिपर्यन्तं प्रत्येकं विषयमुध्दिश्य लक्षणानि निर्दिष्टानि। एतानि लक्षणानि सर्वाण्यापि सर्वैरपि सर्वविषयेष्वपि अनुसर्तव्याणि । साधारणतया वास्तुशास्त्रेषु निर्माणविषयसम्बध्दाः विषयाः एवमुच्यन्ते । 1.मानप्रमाणम् 2.तलविन्यासः 3.पादविन्यासः 4.शङ्कुस्थापनम् 5.भूमिलम्बविधिः 6.गर्भविन्यासः 7.उपपीठविधिः 8.अधिष्ठानविधिः 9.स्तम्बलक्षणम् 10.मण्टपलक्षणम् 11.द्वारवातायनलक्षणम् 12.प्रस्तरम् 13.प्राच्छादनम् 14.विमानलक्षणम् 15.गोपुरलक्षणम् 16. प्रवेकशकर्म (देवालयविषये प्रत्येकविधानम् भवति) ।

**उपसंहारः**

एवं प्रकारेण वास्तुशास्त्रसम्बध्दाः विषयाः विविधपुराणेषु प्रत्येकवास्तुशास्त्रग्रन्थेषु च विपुलं विस्तृतं विवरणं लभ्यते । वास्तुशास्त्रनियमाः सर्वेऽपि मानवकल्याणायैवोपदिष्टाः। अतः मानवालयनिर्माणे अथवा देवालयनिर्माणेऽपि च वास्तुशास्त्रोक्तनियामान् अवश्यम् अनुसरेत् इत्ययं वास्तुशास्त्रग्रन्थावलोकनेन अस्माकं ज्ञायते ।

**पादटिप्पण्यः**

1. संग्रहशिरोमणि
2. मत्स्यपुराणम् 251 अध्यायः 2.3 श्लोकाः
3. अग्निपुराणम् 106 तम अध्याये प्रथमश्लोकः
4. गरुडपुराणम्
5. गरुडपुराणम्
6. कौटिलीयम् अर्थशास्त्रम्
7. अग्निपुराणं 247-1-3
8. ब्रह्माण्डपुराणम्ब्रह्माण्डपुराणम् 7-105
9. शुक्रनीतिसारः 1.213,214
10. अग्निपुराणम् 106- 18-20
11. मत्स्यपुराणम् 255-33-36
12. मत्स्यपुराणम् 269-1-6
13. गरुडपुरामम् 148 -4-5
14. अमरकोशः 2.2.9 ।
15. भविष्यमहापुराणम् 130 अध्यायः 23-26
16. गरुडपुराणम् आचारखंडं 47-21,22
17. अग्निपुराणम् 24-1-5
18. कामिकागमः 33 पटलम्

**उपयुक्तग्रन्थसूची**


1. अग्निपुराणम् अनन्दाश्रमग्रन्थावलिः
2. कामिकागमः-
3. गरुडपुराणम् –न्यू भारत् बुक् कार्पोरेषन्
4. मत्स्यपुराणम् – आर्षविज्ञानट्रस्ट्
5. मानसारः-मुन्षीराम मनोहरदास् पब्लिषर्स्
6. विष्णुधर्मोत्तरपुराणम् – आर्षविज्ञानट्रस्ट्
7. अग्निपुराणम् –नागु प्रकाशक्
8. भविष्यपुराणम् –